https://universitynews.in/

# M.A. (Previous) EXAMINATION, 2018

## SANSKRIT

### Third Paper ( भारतीय दर्शनम् )

**Time allowed : Three hours** **Maximum marks : 100**

1. (अ) संस्कृतभाषामाध्यमेन व्याख्या करणीया-

(क) असदकरणात् उपादानगृह्णात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।।

अथवा

औत्सुक्यविनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः।
पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम्।। 6

(ख) जन्ममरणकरणानां प्रतिनियमादयुगपत् प्रवृत्तेश्च।।
पुरुष बहुत्वं सिद्धं त्रैगुण्य विपर्ययाच्चैव।।

अथवा

दृष्टमनुमानमाप्तवचनं सर्वप्रमाण सिद्धत्वात्।
त्रिविधं प्रमाणमिदं प्रमेयसिद्धि प्रमाणाद्धि देवगिरौ।। 6

(आ) पुरुषबहुत्वमिति सिद्धान्तस्य विवेचना देवगिरौ करणीया। 8

अथवा

सांख्यदर्शने प्रकृतिस्वरूपं विवेचनीयम्। 8

2. (अ) सप्रसंगी व्याख्या विधेया-

(क) त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशोलक्षण परीक्षा च इति। उद्देशस्तु नाममात्रेण वस्तु संकीर्तनम्। तच्चास्मिन्नेव सूत्रे कृतम्। लक्षणं तु असाधारणधर्मवचनम्। यथा गोः सास्नादिमत्त्वम्। लक्षितस्य लक्षणमुपपद्यते न वेति विचारः परीक्षा। 10

अथवा

उक्तानां पक्षधर्मत्वादिरूपाणां मध्ये येनं केनापि रूपेण हीना अहेतवः। तेऽपि कतिपय हेतुरूपयोगात् हेतुवदाभासमाना हेत्वाभासाः। ते चासिद्ध-विरुद्धअनैकान्तिक-प्रकरणसमकालात्ययापदिष्टभेदात् पञ्चैव। 10

(ख) अतिदेश वाक्यार्थ स्मरण सहकृतम् गोसादृश्यविशिष्ट पिण्डज्ञानं उपमानम्। यथा गवयमजानन्नपि नागरिको यथा गौस्तथा गवय इति वाक्यं कुताश्चिदारण्यकपुरुषात् श्रुत्वा वनं गतो वाक्यार्थं स्मरन् यदा गोसादृश्यविशिष्टं पिण्डं पश्यति तदा तद् वाक्यार्थस्मरणसहकृतं गोसादृश्यविशिष्ट पिण्डज्ञानमुपमानम् उपमितिकरणत्वात्। 10

अथवा

https://universitynews.in/

तथा हि 'अयं देवदत्तो रात्रौ भुङ्क्ते दिवा अभुञ्जानत्वे सति पीनत्वात्। यस्तु न रात्रौ भुंक्ते नासौ दिवाऽभुञ्जानत्वे सति पीनो यथा दिवा रात्रावभुञ्जानोऽपीनो च चायं तथा, तस्मान्न तथेति। केवलव्यतिरेक्यनुमानेनैव रात्रिभोजनस्य प्रतीयमानत्वात् किमर्थापत्तिः पृथक्त्वेन कल्पनीया। 10

(आ) प्रत्यक्षप्रमाणं विवेचनीयम्।

अथवा

पाठ्यपुस्तकमनुसृत्य कारणस्वरूपं प्रतिपादनीयम्। 10

3. (अ) सप्रसंगा व्याख्या करणीया–

(क) स्थूलभूतानि तु पञ्चीकृतानि पञ्चीकरणं त्वाकाशादिपञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान् पञ्चभागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्धभागपरित्यागेन भागान्तरेषु संयोजनम्।

अथवा

अयं कर्तृत्वभोक्तृत्वसुखित्व दुःखित्वाधभिमानित्वेनेहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते मनस्तु ज्ञानेन्द्रियैः सहितं सन्मनोमयकोशो भवति। https://www.mdsuonline.com 8

(ख) अज्ञानं तु सदसदभ्यामनिर्वचनीयम् त्रिगुणात्मकं ज्ञानविरोधीभावरूपं यत्किञ्चिदिति यदन्त्यहमज्ञ इत्याद्यनुभवात् देवात्मशक्ति स्वगुणैर्निगूढाम्। इत्यादिश्रुतेश्च। 8

अथवा

अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्वद्वस्तुविवर्तस्य वस्तुनोऽज्ञानादेः प्रपञ्चस्यवस्तु मात्रत्वम्।

(आ) वेदान्तदर्शने अनुबन्धचतुष्टयं विवेचनीयम्। 8

अथवा

वेदान्तदर्शने अज्ञानस्य स्वरूपं विवेचनीयम्। 8

4. (अ) सप्रसङ्गा व्याख्या करणीया–

(क) 'बर्हिषि रजतं न देय' मित्यादिनिषेधशेषस्य, सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम् इत्यादेर्निषेधस्य निन्दितत्वबोधकतया अर्थवत्त्वम्। न च प्राशस्त्यादिबोधस्य निष्प्रयोजनत्वेन नार्थवादस्मार्थवत्त्वामिति वाच्यम्। आलस्यादिवशादप्रवर्तमानस्य पुंसः प्रवृत्त्यादिजनकत्वेन तद्बोधस्योपयोगात्।

अथवा

तथा हि यथा विधिः प्रवर्तनां प्रतिपादयन् स्वप्रवर्तकत्व निर्वाहार्थं विधेयस्य यागादेरिष्टसाधनत्वयाक्षियन पुरुषं तत्र प्रवर्तयति, तथा न कलञ्जं भक्षयेदित्यादिनिषेधोऽपि निवर्तनां प्रतिपादयन् कलञ्जभक्षणस्य परानिष्टसाधनत्वमाक्षिपन् पुरुषं ततो निवर्तयति। 8

https://universitynews.in/

(ख) न तु तदुच्चारणमदृष्टयर्थम्, संभवति दृष्ट फलकत्वेऽदृष्टफलकल्पनाया अन्याय्यत्वात्, न च दृष्टस्यार्थस्मरणस्यप्रकारान्तरेणापि संभवान्मंत्राम्नानं व्यर्थमिति वाच्यम्। मन्त्रैरेव स्मर्तव्यमिति नियमविधि-आश्रयणात्। नानासाधनसाध्य क्रियायामेकसाधनप्राप्तावप्राप्तस्यापरसाधनस्य प्रायको विधिर्नियमविधिः। 8

अथवा

'न च चोदना लक्षणोऽर्थो धर्म' इति सौत्रवल्लक्षणविरोधः, चोदनापदस्य-विधिरूपवेदैकदेशपरत्वादिति वाच्यम्। तत्रापि चोदनाशब्दस्य वेदमात्रपरत्वात्। वेदस्य सर्वस्य धर्मतात्पर्यवत्त्वेन धर्मप्रतिपादकत्वात्। 8

(आ) पाठ्यपुस्तके नामधेयप्रकरणस्य वैशिष्ट्यम् विवेचनीयम्। 10

अथवा

पाठ्यपुस्तके विधिप्रकरणस्य महत्त्वं प्रतिपादनीयम्। 10

https://universitynews.in

https://universitynews.in/